श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ भूसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ भूसूक्तम् ॥

भूमि॑र्भू॒म्ना द्यौर्व॑रि॒णाऽन्तरि॑क्षं महि॒त्वा।
उ॒पस्थे॑ ते देव्यदिते॒ऽग्निम॑न्ना॒दम॒न्नाद्या॒याऽऽद॑धे।
आऽयङ्गौः पृश्नि॑रक्रमी॒ दस॑नन्मा॒तरं॒ पुन॑ः।
पि॒तरं᳚ च प्र॒यन्थ्सुव॑ः।
त्रि॒ग्ं॒ शद्धाम॒ विरा॑जति॒ वाक्प॑त॒ङ्गाय॑ शिश्रिये।
प्रत्य॑स्य वह॒ द्युभि॑ः।
अ॒स्य प्रा॒णाद॑पान॒त्य॑न्तश्च॑रति रोच॒ना।
व्य॑ख्यन् महि॒षः सुव॑ः।
यत्त्वाँ᳚ क्रु॒द्धः प॑रो॒वप॑ म॒न्युना॒ यदव॑र्त्या।
सु॒कल्प॑मग्ने॒ तत्तव॒ पुन॒स्त्वोद्दी॑पयामसि।
यत्ते॑ म॒न्युप॑रोप्तस्य पृथि॒वीमनु॑ दध्व॒से।
आ॒दि॒त्या विश्वे॒ तद्दे॒वा वस॑वश्च स॒माभ॑रन्॥ 1॥

मे॒दिनी॑ दे॒वी व॒सुन्ध॑रा स्या॒द्वसु॑धा दे॒वी वा॒सवी᳚।
ब्र॒ह्म॒व॒र्च॒सः पि॑तृ॒णाग् श्रोत्रं॒ चक्षु॒र्मन॑ः।
दे॒वी हिर॑ण्यगर्भिणी दे॒वी प्रसू॒वरी᳚।
सद॑ने स॒त्याय॑ने सीद।
स॒मु॒द्रव॑ती सावि॒त्री हनो॑ दे॒वी म॒ह्यङ्गी᳚।

[स॒मु॒द्रवं॑ती सावि॒त्री ह॒नो॑ दे॒वी म॒ह्यगी॑।]
म॒होधर॑णी म॒होध्यं॑तिष्ठाः शृ॒ङ्गे शृं॑ङ्गे य॒ज्ञे यं॑ज्ञे विभी॒षिणी॑।
[म॒हीधर॑णी म॒होव्यधिं॑ष्ठाः शृ॒ङ्गे शृं॑ङ्गे य॒ज्ञे यं॑ज्ञे विभी॒षिणी॑।]
इन्द्रं॑पत्नी व्या॒पिनी॑ सु॒रसं॑रिदि॒ह।
वा॒यु॒मती॑ जल॒शयं॑नी श्रि॒यंधा॒ राजा॑ स॒त्यन्धो॒ परिं॑मेदिनी।
श्वो॒परिं॑धत्तं गाय।
वि॒ष्णु॒प॒त्नीं मं॑हीं दे॒वीं मा॒ध॒वीं मा॑धव॒प्रियाम्।
लक्ष्मीं॑ प्रि॒यसं॑खीं दे॒वीं न॒मा॒म्यच्युं॑त व॒ल्लभाम्।
ओं ध॒नु॒र्ध॒रायै॑ वि॒द्महे॑ सर्वसि॒द्ध्यै च॑ धीमहि।
तन्नो॑ धरा प्रचो॒दया॑त्॥ 2॥

शृ॒ण्वन्तिं॑श्रो॒णाम॒मृतं॑स्य गो॒पाम्।
पुण्यां॑मस्या॒ उपं॑शृणोमि॒वाचं॑म्।
म॒हीं दे॒वीं विष्णुं॑पत्नीमजू॒र्याम्।
प्र॒तीचीं॑ मेनाग्ं ह॒विषा॑ यजामः।
त्रे॒धा विष्णुं॑रुरुगा॒यो विचं॑क्रमे।
म॒हीं दिवं॑ पृथि॒वीम॒न्तरिं॑क्षम्।
तच्छ्रो॒णैति॒ श्रवं॑ इ॒च्छमा॑ना।
पुण्य॒ग्ग्॒श्लोकं॒ यजं॑मानाय कृण्व॒ती॥ 3॥

॥ इति भूसूक्तं समाप्तम्॥